तत्कालविशेषविशिष्टाऽऽहूयते। इह पुनरप्राकृतत्वात्कालस्य तेनोपलक्षणं प्रकृत्या सुब्रह्मण्याया अयुक्तमिति मन्त्रमानेनानवष्टता कालसङ्ख्याविशेषणाऽऽह्वातव्या। सुत्यामागच्छेति कालसंशयत्वादित्यस्यायमर्थः। प्रकृतौ द्वादशाहे सुत्यानीत्यादयःसङ्ख्याविशेषाः किमुपसदहःसङ्ख्याविशेषप्रयुक्ताः आहोस्वित् प्राक्सुत्याबन्त्यहानि। तत्र तदहःसङ्ख्याप्रयुक्ता इत्येवङ्कालसंशयत्वादित्यर्थः” वृ०। “उत्सर्गमेके सुत्योपसङ्गणत्वात्” सू०। “सुब्रह्मण्याया उत्सर्गमेके इच्छन्ति सुत्योपसङ्गणत्वात्। किमिदं सुत्योपसङ्गणत्वमिति? सुत्यानामेवायङ्गुणो नोपसदां क्रमाल्लिङ्गं बलीय इति। अतोऽयमुपसदाङ्गुण उपसत्कालवर्त्तित्वात् उपसङ्गणत्वोपचारः अग्निहोत्रादिमासानामसुत्यत्वात् उपसत्कालत्वात् सुब्रह्मण्योत्सर्गमेक आहुरित्यर्थः” वृ०। “क्रिया त्वेव प्रवृत्ते ह्यन्तमगत्वाऽवस्थाने दोषः” सू०। “अस्याः क्रियैव निश्चीयते सोमयागसाधनसंस्कारत्वात् मन्त्रस्य, प्रकृतौ सोमयागादूर्ध्वं यावत्सुत्याकालस्तावदाहूयते। तद्वदत्राप्याह्वातव्या। तावतःकालस्योपसत्स्वेवैतत्सम्बन्धादस्या उपसत्सम्बन्धः तदभावान्नास्यास्त्यागो युक्तः। अत्रायमपि विशेषोऽस्ति। औचित्यादपि न त्याज्या। आदितआरभ्य सर्वेष्वेवाहःस्वाह्वयन्ति कथमिदानीं नाह्वयन्ति। नूनमयं सोमोऽस्मभ्यन्न दास्यत इति देवतायाः शङ्का स्यात् तन्निवृत्त्यर्थमाह्वातव्या। प्रारब्धस्य मध्ये त्यागस्य कारणाभावात् त्यागे दोष एव स्यादित्यभिप्रायः। परवदर्थविचारोऽत्र स्वपदार्थपरिज्ञानार्थ एव। अतिप्रैषः स्वश्सुत्यरूपोह्यत इति” वृ०। “त्रिवृता मासं पञ्चदशेन मासम् सप्तदशेन मासम् एकविंशेन मासम् त्रिणवेन मासम् अष्टादशत्रयस्त्रिंशानि द्वादशाहस्य दशाहानि। महाव्रतञ्चातिरात्रश्च” सू०। “अत्र पृष्ठ्यस्य पञ्चभिरहोभिः पञ्च मासाः कर्त्तव्याः। षष्ठेनाष्टादशाहानि दशरात्रो महाव्रतमुदयनीयः। क्लृप्तोक्तत्वान्नात्र प्रायणीयः” वृ०। “सर्वेण यज्ञेन यजन्ते य एतदुपयन्ति” सू०। “स्तुतिवादोऽयं बहूनामत्र सम्भवाद्वृत्विक्समासोऽनेन सूत्रकारेण न सूत्रितः। स कर्त्तव्यश्चेत् परप्रत्ययादेव कर्त्तव्यः” नारायणवृत्तिः कात्या०श्रौ० २४,४,२, सूत्रादौ विशेष उक्तो यथा “कुण्डपायिनामयनं पौर्णमासीदीक्षम्” सू०। कुण्डपायिनामयनमिति सत्रस्य संज्ञा तस्य पौर्णमास्यां दीक्षा भवति” कर्कः। “चतुर्थ्यां वाऽपरपक्षस्य” सू०। इति विकल्पः फाल्गुनापरपक्षस्य वा चैत्र्यां पौर्णमास्यामिति” कर्कः “मासं दीक्षाः” सू०। “तस्य भवन्ति” कर्कः। “सोममुपनह्य सुत्यास्थानेषु मासमग्निहोत्रं जुह्वति” सू०। सोमोपनहनं कृत्वा यानि सुत्यास्थानानि तेष्वग्निहोत्रहोमः। अग्निहोत्रं च सायारम्भं प्रातरपवर्गम् तत्र द्वावपि होमौ कालैक्यात्तन्त्रेणोपक्रमितव्यौ। प्रधानस्य तु भेदः चतुर्गृहीतेनाग्नेयीं सायमाहुतिं हुत्वा पुनश्चतुर्गृहीतेन सौरीमाहुतिं जुहोति तन्त्रेणोत्तरां जुहोति। गार्हपत्यकार्य्यं तत्र प्रागभिहितएव न शालाद्वार्य्ये, ज्योतिष्टोमे हि तच्छ्रुतम् न चाग्निहोत्रं ज्योतिष्टोमः न च तदङ्गत्वमिति आहवनीयस्त्वतिप्रणीत एव” कर्कः “सोमबन्धनपूर्वकम् अत्राग्निहोत्रशब्दोनित्याग्निहोत्रधर्मातिदेशार्थः ततश्च तद्धर्मकं कर्मान्तरं मासपूर्तिपर्य्यन्तं प्रत्यहं भवति” सं०व्या०। “दर्शपूर्णमासाभ्यां मासम्” सू०। “नयेयुः” कर्कः। “पक्षादौ यद्यद्धविस्तत्सर्वस्मिन्” सू०। “पक्षस्यादौ प्रतिपदि यद्यद्धविस्तदेव सर्वस्मिन् पक्षे भवति सकले शुक्ले दर्शेष्टिः, सकले कृष्णे पौर्णमासेष्टिः” सं०व्या०। “सारस्वते च प्रथमे” सू०। “एवमेव” कर्कः “तन्त्रेण वा समस्तचोदितत्वात्” सू०। “वाशब्दः पक्षव्यावृत्तौ तन्त्रेणैव दर्शपूर्णमासौ कर्त्तव्यौ समस्तयोर्हि चोदना “दर्शपौर्णमासाभ्यां मासमिति” नह्यत्र कालभेदकः तस्मादग्निहोत्रवदत्रापि तन्त्रमेव” कर्कः “न दर्शपौर्णमासस्य पक्षभेदेनानुष्ठानम् किं तर्हि तन्त्रेण कर्तव्यौ” कुतः? समस्तचोदितत्वात् समस्तयोरेव दर्शपौर्णमासयोः प्रत्यहं मासपर्यन्तं विहितत्वात् सारस्वते तु पक्षभेदेनैव, तत्र तथैव विधानात्” सं०व्या०। “अग्निहोत्रं च” सू०। “अस्य सूत्रस्य पूर्वमेवाभिहितो न्यायः” कर्कः तन्त्रेण न तु नित्याग्निहोत्रवत् सायम्प्रातः पृथक्पृथगिति अतो दिवस एव सायम्प्रातस्तनमग्निहोत्रं तन्त्रेणैव होतव्यम् एककालत्वादङ्गानि तन्त्रेण प्रधानाहुतयस्तु भिन्नाः” सं०व्या०। “पृथङ्मासाश्चातुर्मास्यपर्वभिः” सू० “नीयन्ते वैश्वदेवेन मासम्” “वरुणप्रघासैर्मासम् साकमेधैर्मासम् शुनासीरीयेण मासमिति ताण्ड्य० श्रुतेः” कर्कः। “पृथक् पृथक् चत्वारो मासा नेयाः” सं०व्या०। “साकमेधा दर्शपूर्णमासवत्” सू०। “तन्त्रेणोक्तो न्यायः” कर्कः। “सोमा वा सामान्यात्” सू०। “एते अग्निहोत्रादयः सोमा वा भवन्ति कुतः सामान्यात् सत्रं हि सोमयागैः पूरणीयम्” सं०व्या०। “न जुहोतिशब्दात्” सू०। ‘नैतदेवम् सोमा इति कुतः?